# देशहितार्थं जीवामः

एहि सुधीर ! एहि सुविक्रम !
खेल-प्रान्तरं गच्छामः ।
धावन-कूर्दन-चलनैः खेलैः
वज्रकायतां विन्दामः ।।

एहि सुशीले ! एहि सुभद्रे !
पुष्पवाटिकां गच्छामः ।
विविधैः कुसुमैर्विधाय मालां
विघ्नविनाशकमर्चयामः ।।

एहि दिनेश ! प्रणव ! गणेश !
ज्ञाननिधिं सञ्चिनुयामः ।
एहि शारदे ! गिरिजे ! वरदे !
ज्ञानवारिधौ विहरामः ।।

तन्वा मनसा हितं चरन्तः
सदा गुरून् अनुगच्छामः ।
भारतमातुः सेवासक्ताः
देशहितार्थं जीवामः ।।

## टिप्पणी

**शब्दार्थः -**

कूर्दनम् - प्लवनम् (ଡେଇଁବା), वज्रकायताम् - कठिनशरीरम् (କଠିନ ଶରୀର), विन्दामः - प्राप्नुमः (ପାଇବା), अर्चयामः- पूजयामः (ପୂଜା କରିବା), चिनुमः - सञ्चयं करवाम (ସଞ୍ଚୟ କରିବା), तन्वा - शरीरेण (ଶରୀର ଦ୍ୱାରା) ।

## अभ्यास :

1. **गीतमिदं सस्वरं गायत ।**

2. **उचितपदेन शून्यस्थानं पूरयत ।**

(क) खेलप्रान्तरं ______________________ । (गच्छामि, गच्छाव:, गच्छाम:)

(ख) ______________________ विन्दाम: । (वज्रकायता, वज्रकायतां, वज्रकायं)

(ग) एहि सुशीले एहि ______________________ । (सुभद्रा, सुभद्रा:, सुभद्रे)

(घ) ______________________ गच्छाम: । (पुष्पवाटिकां, पुष्पवाटिके, पुष्पवाटिका)

(ङ) विविधै: ______________________ विधाय मालाम् । (कुसुमै:, कुसुमेभ्य:, कुसुमान्)

(च) ______________________ सञ्चिनुयाम: । (ज्ञाननिधि:, ज्ञाननिधी, ज्ञाननिधिं)

(छ) सदा गुरून् ______________________ । (अनुगच्छाम:, अनुगमाम:, अनुगमसि)

3. **स्तम्भमेलनं कुरुत ।**

| 'क' | 'ख' |
|---|---|
| एहि शारदे ! | गच्छाम: |
| तन्वा मनसा | विन्दाम: |
| पुष्पवाटिकां | गिरिजे ! वरदे ! |
| वज्रकायतां | हितं चरन्त: |
| ज्ञानवारिधौ | अर्चयाम: |
| विघ्नविनाशकम् | विहराम: |

4. **पद्यानुसारं सज्जीकुरुत ।**

(क) चलनै: धावन कूर्दन खेलै: । ______________________

(ख) गिरिजे ! एहि शारदे ! वरदे । ______________________

(ग) विधाय मालां कुसुमैः विविधैः । ____________________

(घ) सदा अनुगच्छामः गुरून् । ____________________

(ङ) मनसा तन्वा चरन्तः हितम् । ____________________

(च) सञ्चिनुयामः ज्ञाननिधिम् । ____________________

(छ) जीवामः देशहितार्थम् । ____________________

•